Reg. No. | | | | | | | | | |

# BSCSKL 153/FNDSKL 153/BFTSKL 153/BSASKL 153/ BASSKL 153/BSWSKL 153

**Credit Based II Semester B.Sc./B.Sc. (FND)/B.Sc. (A and VE)/B.Sc.(FT)/ B.A./B.S.W. Degree Examination, September 2022**
**(2018 – 19 and Earlier Batches)**
**SAMSKRITH LANGUAGE**

Time : 3 Hours Max. Marks : 80

***सूचना :*** *1) **संस्कृत**भाषया **कर्णाटक**भाषया **आङ्ग्ल**भाषया वा उत्तराणि लिखत।*
*2) प्रश्नसङ्ख्या IV तथा V प्रश्नयो: **संस्कृते**नैव उत्तराणि लिखत।*

I. श्लोक**द्वयं** अनुवादं कृत्वा विवृणुत। **(2×5=10)**

1) यज्ञोत्सवे स्वपित्रा हठादनाकारिता सती गत्वा।
तनुमजहात् परिभूता क्वापि न गच्छेदनाहूत:।।

2) एकातपत्रं जगत: प्रभुत्वं नवं वय: कान्तमिदं वपुश्च।
अल्पस्य हेतो: बहु हातुमिच्छन् विचारमूढ: प्रतिभासि मे त्वम्।।

3) नान्ने तवेच्छा न च वाससीच्छा शय्यासु नेच्छा न च भूषणेच्छा।
परंत्ववश्यं बत वाञ्छसि त्वं निरन्तरं तत्कटिसूत्रमेकम्।।

II. **पञ्च**वाक्यानि सप्रसङ्गं विवृणुत। **(5×3=15)**

1) किं किं न साधयति कल्पलतेव विद्या।

2) रिपो: विपक्ष: सखा कार्य:।

3) प्रसादचिह्नानि पुर: फलानि।

4) व्याजहार महाघोरम् अभ्यागतमिवान्तकम्।

5) प्राणप्रयाणसमये मयि सन्निधत्ताम्।

6) स्वकोपशान्तिं क्रमशो लभन्ते।

7) फलार्थिनां किं न विषह्यमस्ति।

**P.T.O.**

III. **चतुः**प्रश्नान् प्रबन्धरूपेण उत्तरयत। **(4×8=32)**

1) सूक्तिमुक्तावलीनां मौलिकतां पाठ्योक्तदिशा विवृणुत।
2) दिलीपसिंहयोः संवादं सङ्गृह्णीत।
3) कैकेय्याः मनोरथान् पूरयितुं दशरथः कथं यतते ? वर्णयत।
4) लीलाशुकोक्तदिशा श्रीकृष्णलीलाः संक्षेपेण वर्णयत।
5) 'दुष्टदमनम्' – पाठस्य सारांशं लिखत।
6) 'संमार्जनीस्तुतिः' – पाठस्य सारांशं लिखत।

IV. **द्वौ** संस्कृतेन टिप्पणीं लिखत। **(2×4=8)**

1) रामायणम्।
2) धेनुकदानवः।
3) सुभाषितानि।
4) दिलीपः।

V. निर्देशानुसारं **पञ्चदश**वाक्यानि पूरयत। **(15×1=15)**

अ) रेखाङ्कितानां कारकं सूचयत।

1) रामः तापसः भवतु। (कर्तृ, कर्म, करणम्)
2) रोगाः देहं प्रहरन्ति। (सम्प्रदानं, कर्म, करणम्)
3) मनसा मुकुन्दं स्मरामि। (कर्म, करणम्, सम्प्रदानम्)
4) भिन्नघटात् अम्बः परिस्रवति। (अपादानम्, कर्म, करणम्)
5) वने सिंहाः सञ्चरन्ति। (सम्प्रदानम्, कर्म, अधिकरणम्)

आ) युक्तं समासनाम लिखत।

6) वज्रं पाणौ यस्य सः। (बहुव्रीहिः, द्विगुः, द्वन्द्वः)
7) चोरात् भयम्। (द्विगुः, बहुव्रीहिः, तत्पुरुषः)
8) महान् चासौ ऋषिः च। (द्विगुः, बहुव्रीहिः, कर्मधारयः)
9) त्रयाणां भुवनानां समाहारः। (बहुव्रीहिः, द्वन्द्वः, द्विगुः)
10) कृष्णस्य समीपम्। (बहुव्रीहिः, द्वन्द्वः, अव्ययीभावः)

इ) युक्तकृदन्तं विलिख्य वाक्यं पूरयत।

11) कस्य ते प्रियं ____________। (कार्यम्, कार्यौ, कार्ये)

12) मयि अन्तकः ____________ न प्रभुः। (प्रहर्ता, प्रहर्त्रे, प्रहर्तुम्)

13) मणिहेतोः कृष्णः ____________। (अभिशप्ता, अभिशप्तः, अभिशप्तम्)

14) मूढमतिः न ____________। (उपदेष्टव्या, उपदेष्टव्यः, उपदेष्टव्यम्)

15) शास्त्राणि ____________ अपि भवन्ति मूर्खः। (अधीत्य, अध्येतुम्, अध्येयम्)

ई) युक्तं तद्धितरूपं लिखत।

16) वसुदेवस्य अपत्यं पुमान् ____________। (वसुदेवः, वासुदेवः, वसुदेवम्)

17) मूर्खस्य भावः ____________। (मूर्खः, मूर्खम्, मूर्खता)

18) मम इदं ____________। (मदीया, मदीयम्, मदीयः)

19) सुमित्रायाः अपत्यं पुमान् ____________। (सुमित्रा, सौमित्रिः, सुमित्रम्)

20) रघोः अपत्यं पुमान् ____________। (राघवः, रघुः, रघुणा)